# shrIkRiShNajayantI nirNayaH

# શ્રીકૃષ્ણજયન્તી નિર્ણયઃ

## Document Information

Text title : Sri Krishna-jayanti-nirNaya

File name : krishna_jayanti.itx

Category : vishhnu, krishna, stotra, Ananda-tIrtha, vishnu

Location : doc_vishhnu

Author : Srimad Ananda Tiirtha, also known as Sri Madhva

Transliterated by : Murthy Navarathna murthy at nstl.com

Proofread by : Shrisha Rao shrao at dvaita.org

Latest update : September 3, 1996

Send corrections to : info@dvaita.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણજયન્તી નિર્ણયઃ

શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ
શ્રીમદાનન્દતીર્થ ભગવત્પાદાચાર્ય વિરચિતઃ
શ્રીકૃષ્ણજયન્તી નિર્ણયઃ

રોહિણ્યા મધ્યરાત્રે તુ યદા કૃષ્ણાષ્ટમી ભવેત્ ।
જયન્તી નામ સા પ્રોક્તા સર્વપાપપ્રણાશની(નં) ॥ ૧॥

યસ્યાં જાતો હરિઃ સાક્ષાન્નિ શેતે ભગવાનજઃ ।
તસ્માત્તદ્દિનમત્યર્થં પુણ્યં પાપહરં શુભપરમ્ ॥ ૨॥

તસ્માત્સર્વૈરુપોશ્યા સા જયન્તી નામ સા(વૈ) સદા ।
દ્વિજાતિભિર્વિશેષેણ તદ્ભક્તૈશ્ચ વિશેષતઃ ॥ ૩॥

યો ભુઙ્ક્તે તદ્દિને મોહા(લોભા)ત્ પૂયશોણિતમત્તિ સઃ ।
તસ્માદુપવાસેન્નિત્ય(પુણ્ય)ં તદ્દિને(નં) શ્રદ્ધયાન્વિતઃ ॥ ૪॥

કૃત્વા શૌચં યથા ન્યાયં સ્નાનં કુર્યાદતંદ્રિતઃ ।
પ્રભાત કાલે કુર્વીત યૂગાયેત્યાદિમન્ત્રતઃ ॥ ૫॥

નિત્યાહ્નિકં પ્રકુર્વીત ભગવન્તમનુસ્મરન્ ।
મધ્યાહ્ન કાલે ચ પુમાન્ સાયઙ્કાલે ત્વતન્દ્રિતઃ ॥ ૬॥

સ્નાયેત પૂર્વમન્ત્રેણ વાસુદેવમનુસ્મરન્ ।
તતઃ પૂજાં પ્રકુર્વેત વિધિવત્સુસમાહિતઃ ॥ ૭॥

યનાયેતિ ચ મન્ત્રેણ શ્રદ્ધાભક્તિયુતઃ પુમાન્ ।
કૃષ્ણં ચ બલભદ્રં ચ વસુદેવં ચ દેવકીમ્ ॥ ૮॥

નન્દગોપં યશોદાઞ્ચ સુભદ્રાં તત્ર પૂજયેત્ ।
(અર્ઘ્યં દત્વા સમભ્યચ્ચ્યાર્ભ્યુધિતે શશિમણ્ડલે) ।
જાતઃ કંસવધાર્તાય ભૂભારોત્થારણાય ચ ॥ ૯॥

કૌરવાનાં વિનાશાય દૈત્યાનાં નિધનાય ચ ।
પાણ્ડવાનાં હિતાર્થાય ધર્મસંસ્થાપનાય ચ ॥ ૧૦।

ગૃહાણર્ઘ્યં મયા દત્તં દેવક્યા સહિતો હરિઃ ।
અર્ઘ્યં દત્વાસમભ્યર્ચ્યાભ્યુદિતે શશિમણ્ડલે ॥ ૧૧॥

ક્ષીરોદાર્ણવસમ્ભૂત અત્રિનેત્ર સમુદ્ભવઃ ।
ગૃહાણર્ઘ્યં મયા દત્તં રોહિણ્યા સહિતઃ શશિમ્ ॥ ૧૨॥

દત્વાર્ઘ્યં મનુનાનેન ઉપસ્થાય વિધું બુધઃ ।
શશિને ચન્દ્રદેવાય સોમદેવાય છેન્દવે ॥ ૧૩॥

મૃગિણે શી(સિ)ત બિમ્બાય લોકદીપાય દીપિણે ।
(રોહિણીસક્તચિત્તાય કન્યાદાનપ્રદાયિને)
શીતદીદિતિબિમ્બાય તારકાપતયે નમઃ ॥ ૧૪॥

ઉપસમ્હૃત્ય તત્સર્વં બ્રહ્મચારી જિતેન્દ્રિયઃ ।
વિશ્વાયેતિ ચ મન્ત્રેણ તતઃ સ્વાપં સમાચરેત્ ॥ ૧૫॥

તતો નિત્યાન્હિ કં કૃત્વા શક્તિતો દીયતાં ધનમ્ ।
સર્વાયેતિ ચ મન્ત્રેણ તતઃ પારણમાચરેત્ ।
ધર્માયેતિ તતઃ સ્વસ્થો મુચ્યતે સર્વકિલ્બિષૈઃ ॥ ૧૬॥

॥ ઇતિ શ્રીમદાનન્દતીર્થ ભગવત્પાદાચાર્ય વિરચિતમ્ ॥

॥ જયન્તી નિર્ણયઃ સમ્પૂર્ણમ્ ॥

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ

Encoded and proofread by volunteers as info at dvaita.org

*shrIkRiShNajayantI nirNayaH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*